# महाकवि माघस्य वैदुष्यम्

**डॉ. मनीषा शर्मा**
प्राचार्य
राजस्थान शिक्षक प्रशिक्षण विद्यापीठ, जयपुर

शब्दार्थौ सहितौ काव्यमिति काव्यलक्षणेन काव्ये शब्दार्थयोः साहित्यम् । एतच्च साहित्यं तत्र शब्दार्थगतसम्बन्धरूपम् । शब्दार्थयोः सम्बन्धः प्राधान्येन द्विविधः - सामान्यो विशिष्टश्च । सामान्यः सम्बन्धो व्याकरणगतः, तस्य च वाङमये सर्वत्र स्थितिः । काव्यस्य वाङ्मय सामान्यात् कश्चन विशेष इत्यत्र सम्बन्धस्यापि विशेषः स्वीकार्यः । एतदेव काव्ये शब्दार्थ गतं सम्बन्धवैशिष्ट्यम् । एतद् वैशिष्ट्यं शब्दार्थ वैशिष्ट्यप्रयोज्यमिति काव्ये शब्दस्यार्थस्य चेत्युभयो- वैशिष्ट्यमायातम् ।

**सोऽर्थ स्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।**

**यत्नतः प्रत्यभिज्ञे यौ तौ शब्दार्थौ महाकवेः ।।**

इति प्रतिपादयता ध्वनिकारेण वैशिष्ट्यमेतत्स्पष्टतः स्वीकृतम् । "वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये" इति प्रतिपादयता कालिदासेनापि वैशिष्ट्यमेतत् स्वीकृतम् । शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते इत्यभिदधतो माघस्याप्येतदभिप्रेतम् । अत्रास्माभिर्माघस्य शब्दगतं वैशिष्ट्यं विचारणीयम् । काव्ये शब्दो न हि स्वतः माध्योऽपितु अर्थप्रतिपादकत्वेन साधनभूत इति शब्दगतेन अनेन वैशिष्ट्येनैतदेवाभिप्रेतं यच्छब्दोऽर्थस्योपकारकः स्यात् । अस्मन्मतानुसारं माघे शब्दप्रयोज्यस्य अस्यार्थोपकारकस्य सर्वत्र स्थितिः । अनेनैव हेतुना माघ प्रयुक्ताः शब्दा विशिष्टा इति ज्ञेयम् । शब्दे अर्थदशा एतद्वैशिष्ट्याधानाय पूर्व प्रयुक्तशब्देभ्यो भिन्नानां शब्दानां प्रयोगोऽपेक्षित इत्यर्थस्य सम्यगभिव्यक्तये काव्ये शब्दानां बाहुल्यं स्वाभाविकम् । अनेनैव हेतुना माघेन शब्दबाहुल्यस्य समाश्रय इति 'नवसर्गगते माघे नवशब्दो न विद्यते' इति प्रसिद्धिः । "मेघे माघे गतं वयः" इति यत्प्राचीनैरुक्तम् तत्रापि सत्सु अन्येषु कारणेषु एतदपि कारणं यन्माघ प्रयुक्तानां शब्दानां वैशिष्ट्येनार्थगतं

वैशिष्ट्यमिति तत्प्रति सहृदयानां मुहुर्मुहुः प्रवृत्तिः।

आधुनिकैः समीक्षकैः 'नवसर्गगते माघे नवशब्दो न विद्यते' इत्युक्तेरन्यथाऽऽग्रहः । तेषां मतानुसारं माघप्रयुक्तानां शब्दानां बाहुल्यं पाण्डित्यमात्रस्यप्रदर्शकम्। एतच्च पाण्डित्यं व्याकरणगतम्। 'मेघे माघे गतं वयः' इति यदुक्तं तत्रापि माघस्य शब्दगतं पाण्डित्यप्रदर्शनमेव प्रमुख कारणम् । एवं सति माघगतोदाहरण विवेचनपुरस्सरमस्माभिर्निरूप्यते यन्माघप्रयुक्तानां शब्दानामर्थोपकारकत्वं विद्यते न वा । श्रर्थोपकारकत्वमप्येतदनेकधा सम्भवति उचितशब्दोपादानेन, वर्णध्वनिना, उचितसमासविधानादिना च। श्रत्र प्रथमेनैव प्रकारेण अर्थोपकारकत्वं विचारणीयम्। यथा-

**पादाहतं यदुत्थाय मूर्धानमधिरोहति।**

**स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ।।**

अत्र स्वस्थ शब्दस्य प्रयोगोऽर्थोपकारकः। स्वस्मिंस्तिष्ठतीति स्वस्थः। न हि तस्य उत्थानम्। अधिरोहणस्य तु कथैव का। रजस्तूत्थाय मूर्धानमधिरोहतीत्येवंविधात् पुरुषाद् एवं विधस्य रजस उत्कर्षः स्वाभाविकः। किञ्च अपमानशब्दोऽप्यत्र अर्थोपकारकः । मानस्यापगमोऽपमानोऽपमानं वा । अस्याय- मर्थः-मानस्य सम्मानस्य अपगमोऽपमानः, मानस्य परिमाणस्य चापगमोऽपमानम् । माने परिमाणे च साम्यमिति यस्मात्पुरुषात् सम्मानस्यापगमः, तस्मात्परिमाणस्याप्यपगमः । परिमाणरहित्ञ्च वस्तु ऊर्ध्वं गच्छति यथा रजः । परं परिमाणरहितस्याप्यस्य पुरुषस्य स्वस्मिन् स्थितिरित्येवं विधात् पुरुषाद् रजस उत्कर्षः स्वाभाविकः। किञ्च स्वस्थ शब्दस्य आहतशब्दाद् वैषम्यमपि साभिप्रायम्। देही तु अपमानेऽपि स्वस्थस्तिष्ठति। परं रजः पादाघातेन आहतः पीडितो भवतीत्येवंविधाद् देहिन एवं विधस्य रजस उत्कर्षः स्वाभाविकः। अनेनात्र माघकृतः शब्दप्रयोगो न हि पाण्डित्यप्रदर्शनार्थम् अपितु अर्थोपकारकत्वेन अर्थ वैशिष्ट्याधानार्थमिति ज्ञेयम्। सम्प्रति उदाहरणान्तरं प्रस्तूयते -

**विधाय वैरं सामर्षे नरोऽरौ य उदासते।**
**प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ।।**

अत्र उदासते इति शब्दस्य प्रयोगः साभिप्रायः। उदासते उदासीना भवन्तीत्यस्य शब्दस्य प्रवृत्तिलभ्योऽर्थः। परम् उत् उपरि आसते तिष्ठन्तीत्यस्य व्युत्पत्तिलभ्योऽर्थः। प्रसिद्धमूर्ध्वं ज्वलनं हविर्भुज इति वचनानुसारमग्निरुर्ध्वं

प्रसरति। एवं स्थिते ये: जना: एवंविधमग्निं कक्षे प्रक्षिप्य उदासते उपरि तिष्ठन्ति तेषां स्थितिश्चिन्तनीया एव। किञ्चात्र उदर्चिषमिति शब्दस्य प्रयोगः सार्थकः। उदर्चिषम् उद्गतानि अर्चीषि यस्मात् स उदर्चिः, तम् उदर्चिषम्। अनेन अग्नेरूर्ध्वं प्रसारद्योतनाय तस्य कृतेऽत्र उदर्चिष्शब्दस्य प्रयोगः सार्थकः। किञ्चात्र उदासते इति शब्दस्य शेरते इति शब्दाद् वैषम्यमपि साभिप्रायम्। तच्चेत्थम् - ये जना मन्यन्ते यत्ते उदासते उपरि आसीनाः सन्ति ते तत्त्वतो न हि उपरि आसीना न चैव आसीनाः सन्ति अपितु शयाना विद्यन्ते। शयानानाञ्चाभिभवः सुकर इति सर्वविदितम्। किञ्चात्र उदासते शेरते इत्यनयोः साम्यस्यापि प्रतीतिः। तच्चेत्थम् श्रास् शीङ इत्युभयोरपि धात्वोरत्र आत्मनेपदे प्रयोगः, उभावपि धातू अदादिगणीयौ इत्यत्र साम्य- प्रतीतिः। एतत्साम्यानन्तरमत्र या वैषम्यप्रतीतिस्तत्र कापि तीव्रतेति सहृदयैः स्वयमाकलनीयम्। अपरंच सामर्षे इति पदस्योपादानमतिहृद्यम्। अमर्षः क्रोधस्य स्थायित्वमिति सामर्षे नरे क्रोधस्य यथाकथञ्चित् सततं स्थितिरित्येवंविधे नरे वैरं विधाय औदासीन्याबलम्बनमयुक्तम्।

अनेनैतत्स्पष्टं यन्माघप्रयुक्ताः शब्दा अर्थोपकारका इति तेषां वैशिष्ट्यम्। एभिः शब्दैरेकतस्तु संस्कृतभाषाया अर्थगर्भिता अपरतश्च माघस्य एतद्भाषामर्मज्ञतायाः प्रकाशनम्। एतदपरिज्ञाय यदि आधुनिकैः समीक्षकैरुच्यते यन्माघप्रयुक्तानां शब्दानां प्रयोगः पाण्डित्यप्रदर्शनार्थमस्ति तर्हि नायं देववाण्यास्तन्मर्मविदो माघस्य च दोषः। अत्रैतदपि अवधेयं यद् भट्टिसदृशेभ्यः कविभ्यः सुबन्धु- तुल्येभ्यश्च कविभ्यो माघस्य भिन्ना सरणिः। 'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षण- चक्षुषाम्' इति कथनानुसारं भट्टिकाव्ये व्याकरणप्रयोगप्रदर्शने आग्रहः, प्रत्यक्षर- श्लेषमयविन्यास वैदग्ध्यनिधिः सुबन्धुः सुजनैकबन्धुरिति वचनानुसारं च सुबन्धु रचनायां श्लेषप्रयोगप्रदर्शने निर्बन्धः 'शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते' इत्युक्तवति माघे न हि एतत्सम्भवति। एतत्तु सत्यं यन्माघेन यत्र कुत्रचित् शब्दचित्रस्यार्थचित्रस्य च संयोजनेन पाण्डित्यमपि प्रदर्शितम् परं तत्तु एतदेव प्रदर्शयितुं यन्नाहं शब्दादिचित्रसंयोजने अन्येभ्योऽवरः। परं न हि एतत्काव्यस्यात्म तत्त्वमिति काव्यात्म तत्त्वस्य प्रकाशनाय कविना शब्दवैशिष्ट्यमनुसन्धेयम्।